M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 234

Vetra

Title: Narayanahridaya Stotra.

234

Title	Narayana: Hridaya Stotra from Atharwana Rahasya
Author	
Editor	
Year, Vols.	
Publisher	
Remarks	

234

॥श्रीगणेशायनमः॥श्रीनारायणायनमः॥नारायण
हृदय[illegible] ॥१॥ ॥ॐ अस्यश्रीमन्नारायण
हृदयस्तोत्रमंत्रस्य॥ब्रह्माऋषिः॥नारायणोदेवता॥
अनुष्टुप्छंदांसि॥श्रीनारायणप्रीत्यर्थेनारायण
हृदयस्तोत्रजपेविनियोगः॥अथन्यासः॥ॐनां
अंगुष्ठाभ्यांनमः॥ॐरांतर्जनीभ्यांनमः॥ॐयंम
ध्यमाभ्यांनमः॥ॐणांअनामिकाभ्यांनमः॥ॐयं
कनिष्ठिकाभ्यांनमः॥ॐकरतलकरपृष्ठाभ्यांनमः॥ १
एवंहृदयादि॥ ॐनांहृदयायनमः॥ॐरांशिरसे

स्वाहा॥ॐयांशिखायैवषट्॥ॐनांकवचायहुं॥
ॐयंनेत्रत्रयायवौषट्॥ॐअस्त्रायफट्॥अथध्या
नं॥नारायणायपरिपूर्णगुणार्णवायविश्वोदयस्थि
तिलयोद्भवकारणाय॥ज्ञानप्रदायविबुधायगुणाश्र
यायज्ञात्वात्रिलोकपतयेभगवन्नमस्ते॥१॥ॐना
रायणःपरंज्योतिरात्मानारायणःपरः॥नारायण
परंब्रह्मनारायणनमोस्तुते॥२॥नारायणपरो
देवोदातानारायणःपरः॥नारायणपरंधामना
रायणनमोस्तुते॥३॥नारायणपरंधामध्यानं

नारायणः परः॥ नारायणपरो धर्मो नारायण नमोऽस्तु ते॥
॥३॥ नारायणपरो ध्याता विद्या नारायणः परः॥ नारायणं
नारायणो साक्षी नारायण नमोऽस्तु ते॥४॥ नाराय णा
द्विधिर्जातो जातो नारायणाच्छिवः॥ जातो नारायणा
दिंद्रो नारायण नमोऽस्तु ते॥५॥ रविर्नारायणं तेजो
चंद्रो नारायणो महेश्वरः॥ वह्निर्नारायणं साक्षी नारा
यण नमोऽस्तु ते॥६॥ नारायण उपास्यश्च गुरुर्नारा
यणः परः॥ नारायणः परो बंधुर्नारायण नमोऽस्तु ते॥ २
॥७॥ नारायणात्सुखं सिद्धिर्नारायणं सुखं॥ रवि

नारायणोऽस्तु देवो नारायण नमोऽस्तु ते॥ ८॥ नारायण त्वमेवा
सि दहृतारव्या हृदि स्थितः॥ प्रेरकः प्रेर्य मायानां त्वया प्रे
रितमानसः॥ त्वदाज्ञां शिरसा धृत्य त्वा जपामि जनपा
वनं॥ नानोपासनमार्गाणां भव भूद्भाव बोधकः॥१०॥
त्ता वार्थ हृद्भावभूतो भावसो स्वाप्रदो भव॥ त्वन्मा
यामोहितं विश्वं त्वयैव परिकल्पितं॥११॥ त्वदधिष्ठा
नमात्रेण सिद्धिः सर्वार्थकारिणी॥ त्वमेव तां पुरस्कृत्य
मम कामं समर्पय॥१२॥ न मे त्वदन्यस्त्राता स्ति त्वदन्यं
नहि दैवतं॥ त्वदन्यं न हि जानामि पालकं पुण्यवर्धकं॥ २३

यावत्त्वं सात्त्विको भावो मनसस्त्वनवात्मकः ॥ यत्सिद्धिदो भव
स्त्वाद्य सर्वार्थः सर्वदा विभो ॥१४॥ पापीनामहमेकाग्र्यो दया
लूनां त्वमग्रणी ॥ दयनीयो मदन्योस्ति तव कोत्र जगत्त्रये ॥
॥१५॥ तथाप्यहेनसृष्टाश्चेन्नस्याद्दोषस्य थोदयः ॥ अ
मयाविनसृष्टश्चेन्नस्यात्तवदयालुता ॥१६॥ त्वदन्यः को
त्र पापेभ्यः स्त्राता स्ति जगतीतले ॥ पापसंघपरिक्रांतः
पापात्मा पापरूपधृक् ॥१७॥ त्वमेव माता त्वं पिता त्वमेव त्व
मेव बंधुश्च सखा त्वमेव ॥ त्वमेव विद्या द्रविणं त्वमेव त्वमे
व सर्वं मम देवदेव ॥१८॥ प्रार्थनादशकं चैव मूलाष्टकमथा ३

पिवा ॥ यः पठेच्छृणुयाद्वापि नित्यं तस्य लक्ष्मीः स्थिरा भवे
त् ॥१९॥ नारायणस्य हृदयमादौ जप्त्वा ततः परं ॥ लक्ष्मी
हृदयकं स्तोत्रं पठेच्चेत्तद्विना कृतं ॥२०॥ तत्सर्वं निष्फलं
प्रोक्तं लक्ष्मीः क्रुध्यति सर्वतः ॥ यतत्संकलितं स्तोत्रं सर्वा
भिष्टफलप्रदं ॥२१॥ लक्ष्मीहृदयकं चैव तथा नारायणा
त्मकं ॥ जपेद्यः संकल्पीकृत्य तत्सर्वाभिष्टमवाप्नुयात् ॥२२॥
नारायणस्य हृदयमादौ जप्त्वा ततः परं ॥ लक्ष्मीहृदयकं
स्तोत्रं जपेन्नारायणः पुमान् ॥२३॥ पुनर्नारायणं जप्त्वा
पुनर्लक्ष्मीकृते जपेत् ॥ येवं संध्यं द्विवारेण जपेत्संकलितं

हितत ॥२४॥ लक्ष्मीहृदयकं स्तोत्रं सर्वसिद्धिप्रकाशितं ॥
तद्वज्जपविधिं कुर्याद्धृतत्सकलितं शुभं ॥२५॥ सर्वान्का
मान्नवाप्नोति व्याधिव्याधिभयं हरेत् ॥ इति गुह्यतमं
शास्त्रे मान्यं ब्रह्मादिकैः पुनः ॥२६॥ तस्मात्सर्वप्रयत्ने
न गोपयेत्साधयेत्सुधीः ॥ यस्मिंस्तत्पुस्तकं तिष्ठेल्लक्ष्मी
नारायणात्मकं ॥२७॥ भूतप्रेतपिशाचाश्च नारसिंहस्य गर्जे
नात् ॥ लक्ष्मीहृदयकं स्तोत्रं विधिना सिद्धिदं सुधीः ॥२८॥
भृगुवारे पिरात्रौ च पूजयेत्पुस्तकद्वयं ॥ सर्वदा सर्वदा सत्यं ४
गोपयेत्साधयेत्सुधीः ॥ गोपनात्साधनाल्लोके धन्यो भव

तितत्वतः ॥३०॥ ॥ इति श्री अथर्वणरहस्ये उत्तरभागे ना
रायणहृदयस्तोत्रं संपूर्णं श्रीनारायणार्पणमस्तु ॥छ॥